अङ्क-२६ वेदविद्या
जुलाई-दिसम्बर २०१५ ISSN-2230-8962

# पितृपूजायाः (श्राद्धकर्मणो वा) वैदिकपृष्ठभूमिः

**प्रो. राजेश्वर मिश्रः**

भारतीयार्यसंस्कृतौ पुराकालाद्यज्ञानां विशिष्टं स्थानमिति विदितचरमेव। वस्तुतस्तु अस्यां संस्कृतौ यज्ञो न केवलं श्रेष्ठतमं कर्म इति स्वीकृतो[१]ऽपितु देवरथमित्यभिधानेनाप्यभिहितः[२]। एष यज्ञो जागतिक दृशा ऐश्वर्यस्वरूप एवं[३]। ब्रह्मविद्यारूपश्रीमद्भगवद्गीतायामेषः सर्वकिल्विषाणां विनाशकोऽपि स्वीकृतः[४]। इतोप्यधिकं सांसारिक-ऋणादात्मानं मोचयितुं यज्ञोऽप्येक उपायो मन्यतो[५] श्रेष्ठतमं कर्म सत्यपि दार्शनिकदृष्ट्यास्ति खलु प्रजापतेरेषा सृष्टिरेकं रहस्यम्। रहस्यविद्यामेतामनेकधा विवेचनार्थं वैदिकः कृषिभिर्भारतीयैर्मनीषिभिश्च बहुविधः प्रयत्नो विहितः। तामेव दैवीं सृष्टिमवगन्तुमेषा यज्ञविद्याऽऽपि एका रीतिः, यस्याः सविस्तरं विवेचनं ब्राह्मणग्रन्थेषु कल्पसूत्रेषु चोपलभ्यते। तदनुसारं श्रौतस्मार्तयज्ञानामेकविंशतिः संख्या विद्यते। एते यज्ञाः सप्तसप्तयज्ञानां तिसृषु संस्थासु विभक्ताः वर्तन्ते, तद्यथा - (१) औपासनहोमः, वैश्वदेवः, पार्वणमष्टका, मासिश्राद्धम्, श्रवणा, शूलगवश्चेतियज्ञाः पाकयज्ञसंस्थायामन्तर्भूता विद्यन्ते; (२) अग्निहोत्रम्, दर्शपूर्णमासः, आश्रायणः चातुर्मास्यं, निरुढपशुबन्धः, सौत्रामणी, पिण्डपितृयज्ञश्चेति सप्त यज्ञाः हविर्यज्ञसंस्थायां परिगणिताः सन्तिः; (३) अथ चाग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्रः, वाजपेयः, अप्तोर्यामश्चेति सप्त यज्ञाः सोमसांस्थीयाः यज्ञाः स्वीक्रियन्ते। पृथगेतेभ्यो राजसूय-अश्वमेध-सर्वमेध-प्रवर्ग्यादयो यज्ञा अपि सन्ति, ये सृष्टिरहस्यमनुकीर्तयन्ति।

यज्ञेष्वेतेषु पाकयज्ञानां निरुपणं गृह्यसूत्रेषु स्मृतिग्रन्थेषु च कृतं विद्यते। गृह्य-आवसथ्य-औपासनाग्निषु स्मार्ताग्निषु चैतेषां सम्पादनं क्रियते। हविर्यज्ञानां सोमयागानां चानुष्ठानं श्रौताग्नौ विधीयते, यश्च गार्हपत्य-आहवनीय-दक्षिणाग्नि-सभ्याग्निभेदेन चतुर्विधः स्वीकृतः। ब्राह्मणग्रन्थेषु श्रौतसूत्रेषु चैते यज्ञाः प्रतिपादिताः विद्यन्ते। एतेषां सम्पादनायादौ अग्नेराधानं क्रियते। स्मार्ताग्नेराधानं वैवाहिकचतुर्थीहोमानन्तरं कर्त्तव्यं भवत्यथवा दैव-मानु-षापराधवशादग्रहणावस्थायां दायकाले क्रियते[६]।

---

१ शत. ब्रा. १.७.१५ यज्ञो वै श्रेष्ठतमं कर्म.....।; काठ. सं. ३०.१०; तै.सं. ३.२.१.४

२ काठ. सं. ८.८ यद् यज्ञो मनुष्यरथेनैव देवरथमभ्यातिष्ठति....।

३ शत. ब्रा. १.७.४.१४ यज्ञो वै वसुः....।

४ गीता, ३.१३ यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।

५ त्रै.सं. ६.३.१० यज्ञेन देवेभ्यः प्रजया पितृभ्यः एष वा अनृणः।

६ पार. गृ.सू. १.२.१-२ आवसथ्याधानं दारकाले। दायाद्याकालं एकेषाम्।

शतपथ-ब्राह्मणानुसारं ब्राह्मणेन वसन्ते, क्षत्रियेण ग्रीष्मे, वैश्यण च वर्षर्तौ अग्नेराधानं कर्त्तव्यमितिनिश्चितं[१], परन्तु कात्यायनश्रौतसूत्रे आमावस्यायां तिथावग्नयाधानस्य विधानं विहितम्[२]।

गृह्यसूत्रेषु पाकयज्ञानां पृथक्-पृथक् संख्याङ्गीकृतोपलभ्यते। आश्वलायनगृह्यसूत्रे पाकयज्ञाः त्रिविधाः - (१) हुतः, (२) प्रहुतः, (३) ब्रह्मणिहुतश्चेति। अग्नौ सम्पाद्यमानो यज्ञः हुत इत्युच्यते, विनाग्निमनुष्ठीयमानं कर्म प्रहुत इति कथ्यते, अथ च बलिहरणं, ब्रह्मयज्ञादयो, ब्राह्मणभोजनं चेति ब्रह्मणिहुत इति निगद्यते, उदाहरणार्थम् - आतिथ्यम्, पार्वणम्, श्राद्धादयश्चेति।[३] परन्तु पारस्करगृह्यसूत्रे चतुर्विधाः पाकयज्ञाः चर्चितः - हुतोऽहुतः प्रहुतः प्राशित इति। तदनुसारं होम एव हुतः, सबलिहरणं होमः प्रहुतः, ब्राह्मणभोजनं प्राशितः, शेषमहुत इत्युच्यते [४]। शांखायनगृह्यसूत्रेऽपि चत्वार एते पाकयज्ञाः प्रतिपादिताः। तदनुसारमग्निहोत्रेण हुतः, बलिकर्मणा अहुतः, पितृकर्मणा प्रहुतः, ब्राह्मणभोजनेन च प्राशितः सम्पाद्यन्ते[५]। काठकगृह्यसुत्रे कौषीतकिगृह्यसूत्रेचापि एत एव चत्वारः पाकयज्ञा उल्लिखिताः[६], परन्तु गोपथब्राह्मणे - औपासनहोमः, स्थालीपाकः, नवेष्टिः, बलिहरणम्, पितृयज्ञः, अष्टका, पशुयागश्चैते सप्तविधाः पाकयज्ञाः उक्ताः[७]। एवमेवापस्तम्बगृह्यसूत्रेऽपि - औपासनहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, मासिश्राद्धम्, सर्पबलिः (श्रवणा), ईशानबलिश्च (शूलगवः) एते सप्त यज्ञाः पाकयज्ञसंस्थान्तर्गताः परिगणिताः सन्ति[८]। हुतः, प्रहुतः, अहुतः, शूलगवः, बलिहरणम्, प्रत्यवरोहणम्, अष्टकाहोमश्चैते सप्त यज्ञाः बोधायनेनाङ्गीकृताः स्वकीये गृह्यसूत्रे[९]। कौषिकगृह्यसूत्रेऽपि-औपासनहोमः, हुतादोऽहुतादः, वैश्वदेवम्, बलिकर्म श्रवण, पार्वणमष्टका चेति सप्तपाकयज्ञा निगदिताः। अत्र सर्वेषां पाकयज्ञानां विधानं दर्शपूर्णमासान्तर्गतं कृतं विद्यते[१०]। ब्रह्मयज्ञमपहाय पंचमहायज्ञस्यान्येषु चतुर्षु (देव-भूत-पितृ-मनुष्ययज्ञेषु) हुतादयः चत्वारः पाकयज्ञा अन्तर्भूताः भवन्तीति शतपथ-ब्राह्मणे स्वीकृतम्[११]। इत्थं गृह्यसूत्रेष्वीषद्भेदेन विवेचितेषु पाकयज्ञेषु पितृयज्ञोऽपि यद्यथेकः पाकयज्ञ एव, तथापि पितृपूजारूपेणाथवा श्राद्धकर्मरूपेण लोके प्रसिद्धः। वस्तुतस्तु पितृयज्ञः (श्राद्धकर्म वा) देववत् पितृन् प्रति सम्पाद्यमानो यज्ञविशेष एव, यस्याधारभूमिः श्रौतयज्ञेषु दृग्गोचरीभवति। अत्यन्तं प्राचीनमनुष्ठानमेतत् पितृणां सम्मानार्थमेवार्यसंस्कृतौ पुराकालात् सम्पाद्यते।

---

१ शत. ब्रा. २.१.३.५
२ कात्या. श्रौत. सू. ४.७.१
३ आश्व. गृ. सू. १.१.२-३ त्रयः पाकयज्ञाः । हुताग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजनो ब्रह्मणिहुताः।
४ पार. गृ. सू. १.४.१ चत्वारः पाकयज्ञाः हुतोऽहुतः प्रहुतः प्राशित इति।
५ शांखा. गृ. सू. १.५.१
६ काठ. गृ. सू. २.१.१-७; कौषी.गृ.सू. १.१.२-३
७ गोप.ब्रा. ४.९
८ आप. गृ.सू. १.२.१०-११
९ बौधा. गृ. सू. ७.१८.१-१३; ८.९
१० कौशि. गृ. सू., ६.३० दर्शपूर्णमासाभ्यां पाकयज्ञाः।
११ शत. ब्रा. ११.५.६.२ अहरहर्भूतेभ्यो बलिं हरेत्। तथैतं भूतयज्ञं समाप्नोत्यहरहर्दद्यादोदपात्रात्तथैतं मनुष्ययज्ञं समाप्नोत्यरहरहः स्वधा कुर्यादोदपात्रात्तथैतं पितृयज्ञं समाप्नोत्यरहरहः स्वाहा कुर्यादाकाष्ठात्तथैतं देवयज्ञं समाप्नोति।

वैदिककालादेव भारतीयसंस्कृतौ पितरः समादरणीयाः सम्मान्याश्चासन्। देहपरित्यागानन्तरं मनुष्यः (जीवोबा) तं लोकं गच्छति, यत्र यमवरुणौ द्वौ शासकौ विद्येते, अपि च तत्रैव तस्य पूर्वपितरो निवसन्तीत्यासीदार्याणां दृढो विश्वासः। इहलोके स्वकीयैरिष्टापूर्तादिभिः पुण्यकर्मभिः जीवः तं लोकमाप्नोति तत्र च पितृभिः साकं निवसति। एतस्मात्कारणात् तदानीं तने समये शवदहनकाले प्रेतस्य कृते एतादृशी कामना क्रियते स्म, यत्त्वं पूर्वैभिः पथिभिः तं लोकं विद्धि, यत्र तव पितरः पूर्वं गता विद्यन्ते[1]। एवमेवास्थिकुम्भस्योपरि पुरीषं स्थापयन्नपि मृतकस्यास्थिसंजयं भूमौ दृढीकरणार्थं पितरः स्मर्यन्ते स्म, अथ च यमो प्रेतपुरुषस्य कृतेऽत्रैव निवासं निर्मातु, इत्यपि काम्यते स्म[2]। ऋग्वेदस्य दशममण्डलस्य कतिपयेषु मन्त्रेष्वपि संकेतितं यत् स्वकीयजनानां संरक्षणार्थं, पितृभ्यः समर्पितं द्रव्यं स्वीकर्तुमथ च सौख्यप्रदं सुखमभिलषितुं क्षमायांचापूर्वकं बर्हिषदः पितरः काम्यन्ते स्म[3]। अथर्ववेदीयमन्त्रेभ्योऽप्येतत् ज्ञायते यद् विवाहादिमांगलिकेष्ववसरेष्वपि वर-वधूभ्यामाशीः प्रदातुं पितरः स्मर्यन्ते स्म[4]। अस्मिन्नेव वेदेऽन्यत्र प्रमुखैः पितृभिः सहान्येऽपि पितरः संस्मृताः[5]। एवमेव तैत्तिरीय संहितायां (१.८.५.१), शतपथ-ब्राह्मणे (२.४.२.१९) तैत्तिरीयब्राह्मणेऽपि (१.६.९.७) प्रमुखैः पितृभिः प्रपितामह-पितामह-पितृभिश्च सार्धमन्येभ्योऽपि पितृभ्यः पिण्डदानस्य विधानं विहितम्[6]। ऐतरेय (३.२.४) कौषीतकि (५.६; १०.४, ७) तैत्तिरीय (२.६.३.२; २.१.१.१-२) शतपथ (११.५.६.१-२) गोपथ (१.३.३२; १.५.९) आदिषु ब्राह्मणेषु, अपि च तैत्तिरीयारण्यके (२.१०.१२)प्येतत् संकेत उपलभ्यते यद् यज्ञा-नुष्ठानकालेषु देवैः सह पितरोऽपि सादरं स्मर्यन्ते स्म, तेभ्यः समुचितं हव्यद्रव्यमपि दीयते स्म। इत्थं स्वकीयान् प्रेतपूर्वजान् पितृरूपेणांगीकरणस्याति प्राचीनावधारणावर्तते, यान् सादरं ससम्मानं च विभिन्नासु मंगलवेलासु जनाः स्मरन्तीति विविधाः वैदिकग्रन्थाः प्रमाणयन्ति। वस्तुतस्तु भारतीयसंस्कृतेरेतद् वैशिष्ट्यं यदस्माकं पितरोऽपि देवतुल्या अंगीकृताः। तस्मात्कारणादेव मांगलिकावसरेषु सम्पाद्यमानेष्वनुष्ठानेषु यथा देवेभ्यस्तथा पितृभ्योऽपि सादरं हव्यद्रव्यं प्रदीयते।

---

१ ऋ. १०.१४.७-८ प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः।
उ राजाना स्वधया मदन्ता यमं पश्यसि वरुणं च देवम् ॥
सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन्।
हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः॥

२ तदेव, १०.१८.१३ उत् ते स्तभ्नामि पृथिवीं त्वत् परीमं लोकं निदधन्मो अहं रिषम्।
एतां स्थूणां पितरो धारयन्तु तेऽत्रायमः सादना ते मिनोतु ॥

३ तदेव, १०.४५.४-५ बर्हिषदः पितर उत्यर्वागिमा वो हव्या चकृमा जुषध्वम्।
त आ गतावसा शंतमेनाऽथा नः शं योररपो दधात॥
उपहूताः पितरः .......... तेऽवन्त्वस्मान् ॥

४ अथर्व १४.२.७३ ये पितरो वधूदर्शा इमं वहतुमागमन्।
ते अस्मै वध्वै संपत्न्यै प्रजावच्छर्म यच्छन्तु ॥

५ तदेव द्रष्टव्य १८.२.४९; १८.३.४६; ५९; १८.४.७५-८०

६ विवरणार्थं द्रष्टव्यं ग्रन्थानां निर्दिष्टानि स्थलानि।

आर्यपुरुषाणां सौख्यमैश्वर्यं च पित्रधीनमिति, तेषां दृढावधारणा विश्वासश्च। स्वकीयान् पितृन् प्रति विश्वासेनानेन तेषां मृतकस्य जीवितस्य च मध्ये तादृशो दृढः सम्बन्धः स्थापितो भवति, येन सर्वे परस्परमात्मनः कुटुम्बस्यैकस्यैव सदस्यानावगच्छन्तिस्म[१]। श्रद्धया प्रेमभावनया च तेषां पितृणां स्मरणमथ च तेषां पुण्यतिथौ तैः निमित्तैः श्राद्धभोक्तृभ्यो ब्राह्मणेभ्यो भोजनमन्यावश्यकवस्तूनि च प्रदातुं सम्पाद्यमानानुष्ठानिकी प्रक्रियैव कालान्तरे श्राद्धकर्मेति प्रसिद्धा। सत्यमेतत्, यतो हि ब्राह्मणादिषु ग्रन्थेषु तत्सम्बद्धोपलब्धान्याख्यानान्यपि प्रमाणयन्त्येतद्।

ब्राह्मणग्रन्थेषु पिण्डपितृयज्ञप्रसंगे संकेतितैराख्यानैश्चापि पितृपूजाविषयकानुष्ठानोद्भवस्य प्रचारस्य वा पुष्टिर्भवति, यस्याधारभूमिः पिण्डपितृयज्ञ एवास्ति। तैत्तिरीयब्राह्मणे विषयेऽस्मिन्नेकमाख्यानमुपलभ्यते। तदनुसारं पुराकाले वृत्रासुरमन्यांचासुरान् विहिंस्य यदा देवेन्द्रः आमात्रस्यायागदिने अर्थादमावस्यातिथेरपरस्मिन्नहनि शुक्लप्रतिपदातिथौ स्वकीयं गृहमागतः तदा इन्द्रागमनदि नात्पूर्वस्मिन् दिने तत्र पितर आगताः। तैः पितृभिः सह यज्ञोऽपि तत्रागतः। तथा सति तत्रागत्व देवाः तान् पितृनूचुः 'यद् यज्ञोऽसावस्मत्कृते विद्यते, अतः प्रत्यावर्तयैनमिति'। तदा पितर उक्तवन्तः - 'एष यज्ञोऽस्माभिस्तदैव प्रत्यर्पणीयो भवति, यदा यूयममावस्यादिनेऽस्मभ्यमनुष्ठानमेकं विधास्यथ'। तथास्त्वित्युक्त्वा देवाः तद्वचनमंगीकृतवन्तः। तदारभ्यामावस्यातिथौ एष यज्ञः पितृणां कृतेऽनुष्ठीयते।[२] शतपथब्राह्मणेऽपि पिण्डपितृयज्ञप्रसंगेऽस्मिन्विषये आख्यानमेकं वर्तते। तदनुसारमेकदा प्राणिलोकः प्रजाप्रतेः समीपमगच्छत्, जीवनयापनाय विधिं च तमपृच्छत्। प्राणिलोकेभ्यः प्रजापतिनोक्तस्य जीवनयापनविधेरनुसारं- "यज्ञः देवतानामन्नम्, अमृतत्वं तेषां बलम्, सूर्यश्च तेषां ज्योतिः; पितृभ्यो मासिकं भोजनम्, मनोजवा तेषां पितृणां स्वधा, चन्द्रश्च तेषां ज्योतिः; सायंप्रातश्च मानुषेभ्यो भोजनम्, मृत्युः तेषां मनुष्याणां प्रजा, अग्निश्च तेषां ज्योतिः; पशुभ्यः स्वैरत्वमर्थाद् यदा यदा यत्किंचित् प्राप्तव्यं स्यात्, तदैवतदैव भक्षणं तेषां पशूनां जीवनवृत्तिरस्ति; तथा च तमांसि माया चासुराणां जीवनवृत्तिरिति प्रजापतिनोपदिष्टा। देवाः पितरश्च पशवश्च नोलंघयन्ति नियमानेतान्, परन्तु स्वैरिणः मानवाः तानविक्रमन्ति प्रायः। यो नरः प्रजापतेरेतद् व्रतं पालयति, सः ब्रह्मवर्चसा युक्तो भवति; ब्रह्मवर्चसमेतत् स एव प्राप्नोति, यः प्रतिमासमेकदा पितृभ्यो तदा भोजनं प्रयच्छति यदा पूर्वस्यां पश्चिमायां वा दिशि चन्द्रो न दृश्यते। अतऽमावस्यायामपराह्ने तृतीये प्रहरे पितृभ्यो भोजनं दीयते।[३]

तदनन्तरमापस्तम्बधर्मसूत्रेऽपि (२.७.१६.१-३) प्रकारान्तरेणैककथामाध्यमेन श्राद्धोद्भवः चर्चितः। तदनुसारं पुरा मानवाः देवाश्चास्मिन् जगति युगपन्निवसन्तिस्म। स्वयं सम्पादितयज्ञानुष्ठानुष्ठानफलतः देवास्तु स्वर्गलोकं गताः, परन्तु मानवा अत्रैवास्थिताः। मनुष्येष्वपि ये देववद्यज्ञानुष्ठानं कृतवन्तः, तेऽपि देवैः सह स्वर्गलोके निवासं चक्रुः। यदा मनुरपश्यत्, यन्मम पुत्राः मानवा अत्रैवाशिष्टाः सन्ति, तदा

[१] शत.ब्रा. ११.५.६.१-२

[२] तैत्ति.ब्रा. १.३.१०.१-२

[३] शत.ब्रा. २.४.२.१-८

मानवानां सौख्याय निःश्रेयसे च, तेन कानिचिदनुष्ठानानि प्रारब्धानि। तान्यनुष्ठानानि 'श्राद्धम्' इति संकीर्तितानि। अनुष्ठानेष्वेतेषु पितरो देवा भवन्ति, अपि च श्राद्धभोक्तारो ब्राह्मणा आहवनीयाग्नेः प्रतिनिधित्वं कुर्वन्ति।[१] कथामेनामवलम्ब्येदमभिमतं यदस्मिन् श्राद्धकर्मणि ब्राह्मणभोजनमेव मुख्यं कर्म अस्तीति। तदनन्तरं पुराणेष्वप्येवंविधा श्राद्धकर्मसम्बद्धा अन्याः कथाः प्रचलिताः। विष्णुपुराणे (३.१.३०), वायुपुराणे (४४.३८), भागवतपुराणे (३.१.२२) च मनुरेव श्राद्धदेव इत्यभिमतम्।[२] विष्णुरेव पिता, स एव पितामहः प्रपितामहश्च, तथा च स एव त्रिषु पिण्डेष्ववस्थित इति महाभारतस्य शान्तिपर्वण्युल्लिखितः।[३] वराहावतारकाले विष्णुना श्राद्धकर्म प्रस्थापितमित्यप्यत्र संकेतितम्।[४] इत्थं पुराणेषु श्राद्धकर्म आदिपुरुषेण मनुना सह संयुक्तम्।[५] परन्तु सर्वत्र पितृन् प्रति श्रद्धाभावस्यैव प्राधान्यं दरीदृश्यते। अतोऽस्मिन् कर्मणि मूलतः पितृन् प्रतिनिहिता श्रद्धा, समादरभावश्चेति पुराकालादेव प्रचलितः। श्रद्धाभावश्चास्यानुष्ठानस्य मूलम्, यद् वैदिककालादारभ्याद्यपर्यन्तं यथावत् स्थितं विद्यते।

श्रद्धाशब्देन अणप्रत्ययसंयोगेन (श्रद्धा+अण्) 'श्राद्ध' शब्दो निष्पन्नो भवति। 'श्रद्धापूर्वकं कृतमनुष्ठानं कृत्यं' वेत्यस्यार्थो भवति, यथा श्राद्धकर्मणि सम्पाद्यमानेषु कृत्येषु पितृन् प्रति प्रादुर्भूता श्रद्धैव प्रमुखेति, निगद्यते कोशग्रन्थेष्वपि।[६] श्राद्धकर्ममूले श्रद्धैव प्रयोजनमिति स्कन्दपुराणोऽपि प्रमाणयति।[७] वस्तुतस्तु श्राद्धकर्तुर्जनस्य मनसि दृढैतादृशी श्रद्धा भवति यत् यत्किंच ब्राह्मणेभ्यो दीयतेऽग्नौ वा समर्प्यते, तत्सर्वं पितृभिः प्राप्तव्यं भविष्यत्यथवा तेभ्यो हितकरं भविष्यतीति; अतोऽत्र श्रद्धायाः प्राधान्यमिति सत्यम्। गौतमोऽपि श्राद्धकर्मणि स्फुटतया श्रद्धायाः प्रामुख्यं स्वीकरोति।[८] धार्मिककृत्येषु विश्वासः नैपुण्यमेव श्रद्धास्ति, अपि चैनां विना धार्मिकानुष्ठानस्य न कोऽपि लाभोभवतीति देवलस्याभिमतम्।[९] अत एव सश्रद्धं यत् पिण्डदानादिकं कृत्यं सम्पाद्यते, तत् श्राद्धकर्मेति मन्यते। एषा श्रद्धा वैदिके युगेऽपि तावद्दृढासीद् यावत् परवर्तिकालेऽस्ति।

---

१ आप. धर्म. २.७.१६.१-३ सहदेवमनुष्या अस्मिंल्लोके पुरा बभूवुः। अथ देवाः कर्मभिर्दिवं जग्मुरहीयन्त मनुष्याः। तेषां ये तथा कर्माण्यारभन्ते सह देवैर्ब्राह्मणा चामुष्मिंल्लोके भवन्ति। अथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाच, प्रजानिःश्रेयसे च। तत्र पितरो देवता ब्राह्मणस्त्वाहवनीयार्थे।

२ भाग.पु. ३.१.२२ तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः। तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे

३ महाभारत, शान्ति. अध्याय ३४५

४ विष्णुधर्मोत्तर पु. १.१३९.१४

५ हरिवंश पु. ११.१

६ शब्दकल्पद्रुम पृ. १५५ श्रद्धाप्रयोजनमस्य .......। संस्कृत हिन्दी कोश आप्टे पृ. १०३५ श्रद्धया दीयते यस्मात्तस्माच्छ्राद्धं निगद्यते

७ स्कन्द पु. ६.२१८.३

८ गौत. धर्म., ६.१.१ श्रद्धा यत्र विद्यते तच्छ्राद्धम्

९ देवल, रत्नाकर पृ. १६ प्रत्ययो धर्मकार्येषु तथा श्रद्धेत्युदाहृता। नास्ति ह्यश्रद्धधानस्य धर्मकृत्ये प्रयोजनम्॥

वैदिककालादेव श्रद्धाभावस्य विशेषतो महत्त्वं विद्यते। सम्भवतः कारणादेतस्माद्दषिभिः श्रद्धैका देविरूपेण संकल्पिता संस्तुता चैकस्मिन् सूक्ते।[१] ऋग्वेदेऽन्यत्राप्येषः शब्दः व्यवहृतः।[२] संहितास्वन्यत्रास्य शब्दस्य घटकद्वयस्य (श्रत्+धा) पृथक्-पृथगपि प्रयोगो दृग्पथमायाति, परन्त्वस्यार्थे कोऽपि भेदो न प्रतीयते।[३] 'सत्ये प्रजापतेः श्रद्धानृते चाश्रद्धास्ति, यतो हि श्रद्धया सत्यस्य प्राप्तिर्भवतीति' यजुर्वेदस्यैकस्मिन्मन्त्रेऽप्यभिव्यवतम्।[४] कठोपनिषदि तु स्फुटं न केवलं श्राद्धशब्दस्य, प्रत्युत प्रकारान्तरेण श्राद्धकर्मणोऽपि संकेत उपलभ्यते।[५] अनेनैवं प्रतीयते यच्छ्राद्धशब्दस्योद्भवेऽपि मूलतो वैदिकपृष्ठभूमिरेव कारणमस्ति। वैदिकग्रन्थानन्तरं सूत्रसाहित्ये कल्पसाहित्ये वा शब्दोऽयं पितृकर्मणे व्यवह्रियते सूत्रसाहित्यात् पूर्वं सम्भवतः पितृभ्यः सम्पाद्यमानानामनुष्ठानानां संख्या न्यूनासीदपि च पितृकर्मसम्पादनार्थं पृथक् पृथग् विधेरावश्यकतापि नानुभूयतेस्म, तस्मात्कारणादस्य श्राद्धशब्दस्याधिकः प्रचारो नासीत्। सूत्रग्रन्थेषु, स्मृतिषु प्रायः सर्वेषु परवर्तिग्रन्थेषुच श्राद्धकर्मणि श्रद्धाभावमेवांगीकृत्य श्राद्धं परिभाषितं विद्यते।[६] याज्ञवल्क्यस्मृतौ तु वसुः, रुद्रः, आदित्यश्च श्राद्धदेवाः स्वीकृताः। श्राद्धकर्मणा संतुष्टाः एते देवाः मानवस्य पितृन् तर्पयन्ति।[७] परन्तु मनुना स्पष्टतः पिता वसुरूपः, पितामहो रुद्ररूपः, प्रपितामहश्चादित्यरूपोऽङ्गीकृतः।[८] अत्रपितृप्रतिनिधिभूतानामेतेषां देवानां परिकल्पना 'आत्मा वै जायते पुत्रः' इत्यौपनिषदिकसिद्धान्तेऽथ च यास्कस्य देववाद-सिद्धान्ते[९]ऽवलम्बिता प्रतीयत इत्यवधेयं तथ्यम्। साक्ष्यैरेभिः सर्वथा स्फुटं प्रतिभाति यत् स्वकीयान् प्रेतान् पितृन् देवतुल्यानुररीकृत्य तेभ्यः श्रद्धापूर्वकं सम्पन्नमनुष्ठानमेव श्राद्धमिति। अतः स्वकीयं पितरं, पितामहं, प्रपितामहंच क्रमशः वसोः रुद्रस्य, आदित्यस्य च रूपं मत्त्वा, तेषां कृते श्रद्धापूर्वकं द्रव्यादित्याग एव श्राद्धम्। वस्तुतः यज्ञस्यापररूपमेतत् यथा कात्यायनश्रौतसूत्रे प्रतिपादितम् - 'देवताद्रव्यत्यागो यागः" (२)। फलतः श्राद्धश्रद्धयोः परस्परं घनिष्ठसम्बन्धो विद्यते। अतएव कर्मैतत् श्रद्धापूर्वककमेव सम्पादनीयम्, यतो ह्यनुष्ठानमेतत् वैदिकयज्ञैरपि सम्बद्धं, तेषां सूत्रं संहितासु द्रष्टव्यमथ च तेषां विकासः परवर्तिसाहित्येऽन्वेष्टव्योऽस्ति।

---

१ ऋ. १०.१५१.१ श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः। श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि।। द्रष्टव्य सम्पूर्ण सूक्त भी।

२ ऋ. २.२६.३; ७.३२.१४; ८.१.३१; ९.००३.२, ४ इत्यादयः।

३ तदेव १०.१४७.१ श्रत्ते दधामि प्रथमाय मन्यवे.......। तुलनीया तै.सं. ७.४.१.१ बृहस्पतिरकामयत श्रन्मे देवादधीरन् गच्छेय पुरोधामिति।

४ यजु. १९.७७ अश्रद्धामनृतेऽदधाच्छ्रद्धां सत्ये प्रजापतिः....।

५ कठोप. १.३.१७ य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि। प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते॥

६ गौत. धर्म. ६.१.१ श्रद्धा यत्र विद्यते तच्छ्राद्धम्। याज्ञ. स्मृ., १.१२७ मिताक्षरा - श्राद्धं नामादनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देशेन श्रद्धया त्यागः। श्राद्धसम्, पृ. ३०; श्राद्धकल्पलता पृ. ४ इत्यादयः द्रष्टव्याः।

७ याज्ञ स्मृ. १.२६९ वसुरुद्रादितिसुतापितरः श्राद्धदेवताः। प्रीणयन्ति मनुष्याणां पितृन् श्राद्धेन तर्पिताः॥

८ मनु. स्मृ. ३.२८४ वसून्वदन्ति तु पितृन् रुद्रांश्चैव पितामहान्। प्रपितामहांस्तथादित्यान् श्रुतिरेषा सनातनी।।

९ द्रष्टव्यः नि. ७.४ माहाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते......। तुल. ब्रह्मसूत्र, १.३.२७ शारीरकभाष्यकम्।

भारतीयार्यसंस्कृतौ यज्ञानां विशिष्टं स्थानं महत्त्वं चासीत्। परवर्तिकाले तेषां यज्ञानां नानारूपेण विकासोऽभवत्। यजुर्वेदे यज्ञस्य स्पष्टतयोल्लेखः प्राप्यते। तदनन्तरं ब्राह्मणग्रन्थेषु श्रौतसूत्रेषु चैतेषां विकसितं स्वरूपमुपलभ्यते। अग्न्याधेय-दर्शपौर्णमासादिप्रमुखदशश्रौतयज्ञेषु द्वितीयः, अपि च हविर्यज्ञसंस्थायां परिगणितो दर्शपौर्णमासः यज्ञानां प्रकृतिरिच्युच्यते, यतो ह्यन्ये सर्वेयज्ञाः अस्यानुसारं सम्पाद्यते। यज्ञोऽसौ प्रत्येकं मासस्यामावस्यायां पूर्णिमायां चानुष्ठीयते। यज्ञस्यास्यांगरूपेण पिण्डपितृयज्ञस्यानुष्ठानं क्रियते। सर्वप्रथमं शतपथ-ब्राह्मणे (२.४.२) तैत्तिरीयब्राह्मणे चास्योल्लेखः प्राप्यते। ततः श्रौतसूत्रेषु [१] गृह्यसूत्रेषु [२] चास्य सविस्तरं विवेचनं विद्यते। आचार्यजैमिनिः दर्शपौर्णमासयज्ञान्तर्तते पिण्डपितृयज्ञं न स्वीकरोति, प्रत्युत तस्मात् पृथगेकमनुष्ठानमंगीकरोति।[३] किन्तु 'दर्शपूर्णमासस्यैवांगमेष यज्ञ' इत्याचार्येण कात्यायनेनानुमतमथ च कर्कादिभिरन्यैर्भाष्यकारैः सह पद्धतिकारोऽपि पिण्डपितृयज्ञो दर्शांगमिति स्वीकरोति।[४] वस्तुतः पिण्डपितृयज्ञः श्रौतसूत्रेषु वर्णितः, किन्तु श्राद्धान्यन्यानि गृह्यसूत्रेषु वर्णितानि सन्ति, परन्तु यच्छ्राद्धममावस्यादिने सम्पाद्यते तत् पिण्डपितृयज्ञ आख्यायत इति गोभिलगृह्यसूत्रे निगदितम्।[५] केचन पाश्चात्त्यविद्वांसो यद्यपि विषयेऽस्मिन् विषयेऽस्मिन् नैकमत्यं धारयन्ति।[६] वस्तुतस्तु भारतीयपरम्परास्यानुष्ठानस्य विकासं पिण्डपितृयज्ञादेव स्वीकरोतीति सत्यम्।

ब्राह्मणग्रन्थेष्वपि पितृभ्योऽनुष्ठितो यज्ञः पिण्डपितृयज्ञः कथ्यते। यज्ञेऽस्मिन् प्रतिमासममावस्यातिथौ पितृभ्यो भोज्यद्रव्यप्रदानस्य विधानमस्ति। तत् सम्पादनार्थं तेभ्यो भोज्यद्रव्यरूपेणोदनपिण्डानि प्रदीयन्ते, यत् पितृणां कृते प्रजापतेर्विधानानुकूलमेवानुष्ठीयते। विधानमेतत् पितृपूजाया एको विधिः। तदनुसारं जीवनयापनाय प्रजापतिना देवेभ्यो यज्ञरूपमन्नममृतरूपं बलमादित्यरूपं ज्योतिश्च प्रदत्तम्। एवमेव पितृभ्यो मासिकभोजनमन्नं, मनोजवं स्वधा चन्द्रमारूपं ज्योतिश्च; तथा मनुष्येभ्यः सायं-प्रातः भोजनं, मृत्युरूपं प्रजाग्निरूपं ज्योतिश्च प्रदत्तम्। पशुभ्यः स्वैरेण विचरणमिति वरं दत्तम्।[७] अत एवामावस्यादिने, यदा पूर्वस्यां पश्चिमायां च दिशि चन्द्रो न दृश्यते, तदा

---

[१] आश्व. श्रौत. २.६-७; आपस्त.श्रौत. १.७.१०; कात्या.श्रौत. ४.१.१-३०; सत्या.श्रौत. २.७; बौधा.श्रौत. ३.१०.११ इत्यादयः।

[२] कौशिकगृह्य. ८७, ८८, ८९ कण्डिका; गोभि. गृह्य., १.२.२.४; बौधा. गृह्य. २.२; कोषी. गृह्य. २.१.३२-३४ इत्यादयः।

[३] जैमि. गृह्य. ४.४.१९ पितृयज्ञः स्वकालत्वादनंग स्यात्।

[४] कात्या. श्रौत. ४.१.३० अंग वा समभिव्याहारात; पद्धति पिण्डपितृयज्ञो दर्शांगमिति कर्कादयः सर्वैभाष्यकाराः, नेति सम्प्रदायः।

[५] गोभि. गृह्य. ४.४.१-२ अन्वष्टक्यथालीपाकेन पिण्डपितृयज्ञो व्याख्यातः अमावस्यायां तच्छ्राद्धमितरदन्वाहार्यम्।; एतदर्थम, द्रष्टव्यः धर्मशास्त्रस्य इतिहासः खण्ड २, अध्यायाः ३०-३१

[६] Caland : Altindshche Ahenencutt, P. १६-१७; Hillebrant : Ritual literature vedische opfer and zober P. ११४-११५

[७] शत. ब्रा. २.४.२.१-५

पितृभ्यो भोजनं दीयते, यतो हि पूर्वाह्णो देवानां, मध्यन्दिनो मनुष्याणामथ चापराह्णः पितृणां समयः स्वीकृतः।[१] अस्य सम्पादनविधौ अन्वाहार्यपचनस्य (दक्षिणाग्नेः) उत्तरेण दक्षिणाभिमुखेन यजमानेन तण्डुलानां फलीकरणं क्रियतेऽथ च तानि पच्यन्ते, सोमाय चास्य हविष्यान्नस्याहुतिर्दीयते। प्रत्येकं यज्ञेऽग्नेर्यज्ञभागं त्वनिवार्यत्वेन भवति, परन्त्वत्र सोमाय आहुतिः तस्मात् कारणाद्दीयते, यतो ह्यसौ पितृविषयकोदेवोऽस्ति। पितृभ्यो हव्यं प्रापणादस्य यज्ञस्याग्निः कव्यवाहन उच्यते।[२] ततो दक्षिणाग्नेः दक्षिणेन रेखांकनमेकं क्रियतेऽथ चोदकपात्रमानीय, पितुःपिता महस्य प्रपितामहस्य च नामोल्लेखपूर्वकं तेनोदकेन तेषां हस्तं प्रक्षाल्यतेऽर्थादनेन तेभ्य उदकांजलिर्दीयते। तत् पश्चात् रेखामुपरि शिरांसि दक्षिणतः कृत्वा समूलं दर्भा उपस्तीर्यन्ते (प्रसार्यन्ते), तेषामुपरि च पितृभ्य (अर्थात् पित्रे, पितामहाय, प्रपितामहाय च) ओदनपिण्डानि प्रदीयन्ते।[३] ततोऽत्र "पितरो मादयध्वं यथाभागमावृषायध्वम" (यजु. २.३१) इति मन्त्रांशेन प्रदक्षिणा विधीयते। पुनश्च पितृणां नामोल्लेखपूर्वकं तेषामुपरिजलमभ्युक्ष्यते। तदनन्तरं यजमानः स्वस्थानादीषदनुगत्य तान् पिण्डान् जिघ्रति, यथ च पितृन् नमस्कुर्वन् "गृहान्नः पितरो दत्त" (यजु. २.३२) इत्यनेन मन्त्रांशेन स्वगृहसंरक्षणाय पितृनाशीर्वचांसि याचते, यतो हि "पितरो गृहपालका" इति मन्यते।[४]यज्ञेऽस्मिन् स्वकीयान् पूर्वजान् प्रति श्रद्धाभाव एव प्रेरकतत्त्वं प्रतीयते। तैत्तिरीयब्राह्मणेऽप्यस्य यज्ञस्य(१.३.१०.१-२) एष एव विधिर्निगदितः। प्रायः सर्वेषु श्रौतसूत्रेषु, गृह्यसूत्रेषु च पिण्डपितृयज्ञस्यानुष्ठानविधिः, समयः, यज्ञसंभारादीनीषद्भेदेन समानमस्ति।

यज्ञदृष्ट्या प्रमुखे कात्यायनश्रौतसूत्रेऽप्यस्य यज्ञस्यानुष्ठानसमयोऽमावस्यातिथावपराह्णे चन्द्रदर्शनात् पूर्वमनुमतः।[५] आपस्तम्बश्रौतसूत्रानुसारमपराह्णे यदा वृक्षाणां शिखरेषु सूर्यस्य रश्मयो भवन्ति, तदा पितृपिण्डयज्ञः क्रियते।[६] अनुष्ठानेऽस्मिन् चरु (पिण्ड) निर्माणार्थं दक्षिणाग्नौ तण्डुलानि पच्यन्तेऽपि च दक्षिणाग्नावेवाहुतयो दीयन्ते। 'यज्ञेऽस्मिन् पितृभ्यः पिण्डदानेनैवेषः पिण्डपितृयज्ञः कथ्यत' इति सत्याषाण-श्रौतसूत्रेनिगदितम्।[७] अस्य यज्ञस्य सम्पादनममावस्यायां सायंकालेऽपराह्णे वा कुर्यादिति कौशिकगृह्यसूत्रेणापि[८] गोभिलगृह्यसूत्रेणापि[९]च विज्ञायते। कृत्येऽस्मिन् पितृभ्यो भोज्यादिद्रव्यप्रदान-समयेऽन्ते 'स्वधा' शब्दस्य प्रयोग क्रियते, यतोहि देवाः 'स्वाहा' इतयनेन पितरश्च स्वधया मदन्तः

---

[१] तदेव २.४.२.७-८; २.४.२.८ स वाऽअपराह्णेददाति। पूर्वाह्णे वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितृणां तस्मादपराह्णे.......।

[२] तदेव २.४.२.९-१३; यजु. २.२९ अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहा।

[३] द्रष्टव्यः, शत. ब्रा. २.४.२.१६-१९

[४] तदेव, २.४.२.२०-२४

[५] कात्या. श्रौत. ४.१.१ अपराह्णे पिण्डपितृयज्ञश्चन्द्राऽदर्शनेऽमावस्यायाम्

[६] आप. श्रौत. १.७.२ अपराह्णेऽधिवृक्षसूर्ये वा पिण्डपितृयज्ञेन चरन्ति।

[७] सत्या. श्रौत. २.७ द्रष्टव्य महादेवस्य टीका पिण्डैः पिण्डदानेन पितृभ्यो देवेभ्यो यज्ञो होमः स पिण्डपितृयज्ञः

[८] कौशि.गृह्य. ८७. १-२ अथ पिण्डपितृयज्ञः अमावस्यायां सायं न्यन्हेऽहनि विज्ञायते।

[९] गोभि. गृह्य. ४.४.१-३ अन्वष्टक्यास्थालीपाकेन पिण्डपितृयज्ञो अमावस्यायाम्.......।

स्वकीयं हव्यभागं गृहीत्वा संतृप्ताः शुद्धाश्च भवन्तीति होतृवेदेन ज्ञायते।[१] स्वधा वै पितृणामन्नम्" इत्यननेन कथनेन शतपथ-ब्राह्मणे स्फुटं स्वधैव पितृणामन्नमनुमता।[२] अनुष्ठानेऽस्मिन् "अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमतेस्वाहा" (यजु. २.२९) इत्यनेन मन्त्रेणाग्नये सोमाय चाहुतिर्दीयते। अग्नये सोमयमाभ्यां च हविर्दानेन पितरो विधिवत्सन्तर्पयेदिति मनुस्मृतावपि भणितम्।[३] आहुति प्रदानानन्तरं पितृभ्यः पिण्डदानस्य विधानमस्ति। यजमानोऽत्र समन्त्रकं[४] त्रीणि पिण्डानि नामोल्लेखपूर्वकं पित्रे, पितामहाय, प्रपितामहाय च प्रयच्छति। गृह्यसूत्रेष्वन्येषु ब्राह्मणभोजनादुत्तरं पिण्डदानस्य विधानं विद्यते।[५] हिरण्यकेशी-गृह्यसूत्रेऽप्येष एव विधिरीषद्भेदेन दृश्यते। तदनुसारं भोजनं कृत्वा यदा ब्राह्मणाः प्रस्थानं कुर्वन्ति, तदा तदनुगन्ता यजमानोऽनतिदूरं गत्वावशिष्ट-भोजनस्योपयोगायागाम्यनुष्ठानाय चानुमतिमधिगम्य पितृभ्यः पिण्डदानं करोति। पुत्रं कामयमाना यजमानपत्नी पितामहाय प्रदत्तं मध्यमपिण्डं भक्षयेदेतदप्युल्लिखितं गोभिल-गृह्यसूत्रे।[६] इत्थं प्रायः सर्वत्रैव पिण्डपितृयज्ञस्य समानं विधानं वर्तते, यच्छतपथ तैत्तिरीयब्राह्मणयोर्विधानानुकूलमेवास्ति। अनेनेत्थं प्रतिभाति यच्छतपथादिब्राह्मणेषु प्रतिपादितपिण्डपितृयज्ञादेव परवर्तिकाले प्रत्येकममावस्यादिने पृथग्रूपेण सम्पाद्यमानस्य पार्वणश्राद्धस्य विकासो जातः। विधानमेतत् पितृपूजाया एको विधिः। तदनन्तरमेषा पितृपूजा गृह्यसूत्रेषु श्राद्धमिति नाम्नाभिहिता, या नित्यनैमित्तिक-काम्यरूपैः त्रिधा विभक्ता।

(१) कस्मिंश्चिन्निश्चिते काले सदैव सम्पाद्यमानं श्राद्धं नित्यश्राद्धमुच्यते। तद्यथा-कतिपयानि श्राद्धानि प्रतिदिनं सम्पादितानि भवन्ति, कानिचित् प्रतिमासममावस्यातिथावनुष्ठीयन्तेऽथवाष्टकेति परिकीर्तितासु तिथिषु सम्पाद्यन्ते। (२) तानि कर्माणि नैमित्तिकानि कथयन्ते यानि विशिष्टावसरेषु सम्पादितानि भवन्ति। सामान्यतः तेषां निश्चितः कश्चित् समयो न भवति, यथा- पुत्रजन्माद्यवसरेषु सम्पाद्यमानानि श्राद्धानिनैमित्तिकान्युच्यन्ते। (३) कस्यचित् फलविशेषस्य कामनयानुष्ठीयमानानि श्राद्धानि कर्माणि वा काम्यानि निगद्यन्ते, तद्यथा, कृत्तिकानक्षत्रे रोहिण्यां वा सम्पाद्यमानानि श्राद्धकर्माणि स्वर्गकामनया सन्तानकामनया वानुष्ठीयन्ते। व्यतिरिक्तमेतत् रुद्रधराचार्येण स्वकीये 'श्राद्धविवेकेति' ग्रन्थेनित्ये-नैमित्तिक-काम्य-वृद्धिश्राद्ध-पार्वणभेदेन मनुमतानुकूलं श्राद्धं पंचविधं स्मृतम्।[७] याज्ञवल्क्यस्मृतिटीकाकारेण विज्ञानेश्वरेणापि श्लोकस्यैकस्य (१.२७१) भाष्यं कुर्वता श्राद्धं पंचविधमनुमतं,

---

१ ऋ. १०.१४.३ याँश्च॑ दे॒वा वा॑वृ॒धुर्ये च॑ दे॒वान् त्स्वाहान्ये स्व॒धया॒न्ये म॑दन्ति। तदेव, १०.१४७ उ राजाना स्वधया मदन्ता.....

२ शत.ब्रा.१३.८.१.४

३ मनु.स्मृ. ३.२११ अग्नेः सोमयमाभ्यां च कृत्वाप्यायनमादितः। हविर्दानेन विधिवत्पश्चात्सन्तर्पयेत्पितृन्॥

४ अथर्व १८.४.७५-७७ एतत् ते प्रततामह स्वधा ये च त्वामनु; एतत् ते ततामह स्वधा ये च त्वामनु; एतत् ते तत स्वधा.....। तुल.कौशि. गृह्य. ८८.८-११)

५ शांखा. गृह्य. ४.११-२; आप. गृह्य. ८.२१.१-९

६ गोभि. गृह्य. ४.३.२६

७ बृहस्पति नित्यं नैमित्तिकं काम्यं बृद्धिश्राद्धं तथैव च। पार्वणं चेति मनुना श्राद्धं पंचविधं स्मृतम्॥

परन्तु पूर्वश्राद्धभेदेभ्य एतानि सर्वथा भिन्नानि सन्ति, तद्यथा -अहरहश्राद्धं, पार्वणश्राद्धं, वृद्धिश्राद्धं, एकोदिष्टश्राद्धं सपिण्डीकरणंचेति। पुराणेषु तदनन्तरं श्राद्धसंख्या वर्धिता जम्ता।

प्रसंगेस्मिन् पितृयज्ञस्यापि चर्चा निश्चयेन समीचीना वर्तते। एष यज्ञः पंचमहायज्ञेष्वन्यतमः। गृहस्थाणां दैनिककर्त्तव्येषु पंचमहायज्ञस्य विशिष्टं स्थानमिति विदितचरमेव। सर्वप्रथममस्योल्लेखः शतपथब्राह्मणे संजातः। तत्रैतानि महासत्राणि संज्ञितानि।[१] तदनन्तरं तैत्तिरीयारण्यके एतेषां विवेचनमुपलभ्यते। तदनुसारमेते महायज्ञाः सतति प्रतायन्ते, सतति च संतिष्ठन्ते।[२] तदन्वाश्वलायनगृह्यसूत्रे (३.१.१-४), आपस्तम्बधर्मसूत्रे (१.४.१२-१५) अन्येषु च ग्रन्थेष्वेते विवेचिता विद्यन्ते।[३] गृह्यसूत्रेषु धर्मसूत्रेषु चैतेषां सम्पादनविधिः तैत्तिरीयारण्यकोक्तविधिसदृशो वर्तते। गृहस्थानां जीवहिंसाजनिताः पंचसूनाः भवन्ति, तासां निष्कृत्यर्थमेते पंचमहायज्ञाः प्रायश्चितरूपेण प्रत्यहं सम्पादितव्या भवन्ति।[४] तस्मादेते दैनन्तिदं कर्म नाम्ना कथ्यन्ते।

पितृणां कृते सम्पाद्यमानः पितृयज्ञो दैनिकं कृत्यमस्ति। कृत्यमेतत् तर्पणेन, बलिहरणेन प्रतिदिनं च श्राद्धेनार्थाद्ब्राह्मणैकभोजनेन त्रिधा सम्पाद्यते। बलिहरणे पिण्डरूपं बलिं दद्यादिति काठकगृह्यसूत्रे (५४.१९) कथितम्। मनुस्मृतौ (३.७०) तु पितृयज्ञस्तु तर्पणमिति" उक्त्वोदकेन तर्पणमेव पितृयज्ञोऽनुमतः। परन्तु प्रतिदिनं यथाशक्ति पितृभ्यो मनुष्येभ्यश्च भोजनं यच्छेदिति याज्ञवल्क्यस्मृतेः (१.१०४) टीकाकारस्य विज्ञानेश्वरस्य मतम्। तेनेदमप्यभिहितं यदन्नाभावे कन्दमूलफलादीनि देयानि, परन्तु तेषामप्यभावे जलमेव देयम्।[५] आपस्तम्बधर्मसूत्र (२.२.४.५) शांखायन गृह्यसूत्र (२.१४.१६) आश्वलायनगृह्यसूत्र (१.२.११) बौधायनगृह्यसूत्र (२.८.३४) भारद्वाजगृह्यसूत्र (३.१४) पारस्करगृह्यसूत्र (२.८.९) प्रभृतिषु ग्रन्थेष्वपि पितृयज्ञे बलिहरणस्य क्रिया विहिता। अतो यज्ञेऽस्मिन् तर्पणेन सह बलिहरणमपि कुर्यात्। पितृणां प्रीत्यर्थमन्नाद्येनोदकेन वा पयोमूलफलादिभिर्वा प्रत्यहं श्राद्धं कुर्यादिति मनुस्मृतिकारस्य मतम्।[६] एवं पंचमहायज्ञेषु विहिते पितृयज्ञेऽधिकाधिकमेकं ब्राह्मणमाहूय भोजयितुं

---

[१] शत.ब्रा. ११.५.६.१ पंचैव महायज्ञाः। तान्येव महासत्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति।

[२] तैत्ति.आर. २.१० पंच वा एते महायज्ञाः सतति प्रतायन्ते, सतति संतिष्ठन्ते देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति। यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः संतिष्ठते। यत् पितृभ्यः स्वधा करोत्यप्यपस्तत्पितृयज्ञः संतिष्ठते। यद्भूतेभ्यो बलिं हरति तद्भूतयज्ञः संतिष्ठते। यद् ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः संतिष्ठते। यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठते।

[३] बौधा.गृह्य. २.९.६-१६; भार.गृह्य. ३.१५.८३, ३.१५.८४; कात्या.गृ. २.११; पार.गृह्य. २.९; मान.गृह्य. २.१२; शांखा. गृह्य. १.१.२-३; बौधा.धर्म. २.६.१-८; गौत.धर्म. ५.८, ८.१७; गोभि. धर्म. २.१६.१; मनु. ३.६७-७१; याज्ञ.स्मृ. १.१०२, १०४; हारी.स्मृ. ४.५५-६१ इत्यादय

[४] मनु.स्मृ. ३.६८-६९ पंचसूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥ तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः। पंच क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥

[५] याज्ञ. स्मृ. १.१०४ मितक्षरा-प्रत्यहमन्नं पितृभ्यो मनुष्येभ्यश्च यथाशक्तिं देयम्। अन्नाभावे कन्दमूलफलादि। तस्याप्यभावे जलंदेयम् अपिशब्दात्।

[६] मनुस्मृ. ३.८२ कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा। पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्॥

शक्यते न्यूनातिन्यूनं च केवलमुदकेनैव तर्पणं कुर्तुं शक्यते। अनेनेत्थं प्रतीयते यच्छतपथब्राह्मणे तैत्तिरीयारण्यके चोल्लिखितः पितृयज्ञ एव कालान्तरे सूत्रग्रन्थेषु प्रतिदिनं सम्पाद्यमानेन श्राद्धरूपेण प्रसिद्धः।

एवं ब्ाह्मण-श्रौतसूत्र-गृह्यसूत्रादिषु ग्रन्थेषुपलब्धसाक्ष्याणां सविस्तरं परिशीलनेन तथ्यमिदं स्फुटं प्रतिभाति यच्छतपथब्राह्मणे श्रौतसूत्रेषु च प्रतिपादितः पिण्डपितृयज्ञ एव वस्तुतः श्राद्धप्रक्रियायाः मूलम्, यतोह्यस्यैकपृथग्रूपं सूत्रग्रन्थेषु स्मृतिषु च पार्वण श्राद्धरूपेण प्रचलितम्। प्रायोऽन्येषां सर्वेषां श्राद्धानां विधिः तदनुकूलमेव सम्पादितो भवति। आपस्तम्बगृह्यसूत्रस्य (२१.१) टीकाकारेणानाकुला-चार्येणाप्येत्थमनुमतं यन्मासिश्राद्धं (पार्वणश्राद्धम्) एवाष्टकायाः श्राद्धानामन्यानां च प्रकृतिः, यस्मिन् त्रयाणां पितृणा- (प्रपितामह-पितामह-पितृणा) माह्वानं क्रियते। पार्वणश्राद्धं, यस्य कृते (स्थाने) परिस्थितिवशादथया विषमावस्थायामामश्राद्धं (अपक्वभोजनस्य प्रयोगोऽत्र भवति), हेमश्राद्धं सांकल्पिकश्राद्धं वापि कर्तुं शक्यते, प्रकृतिश्राद्धमस्ति। सर्वाण्यन्यानि एकोद्दिष्ट-अष्टकादीनि श्राद्धानि तदनुकूलं सम्पादितानि भवन्ति। एतस्माद् भिन्नान्यन्यानि श्राद्धानि विकृतश्राद्धमित्युच्यन्ते। तान्यन्यानि श्राद्धानि सन्ति एकोद्दिष्टश्राद्धं (अन्त्येष्टिकृत्यादनन्तरमेकमृतात्मार्थं सम्पाद्यमानं श्राद्धम्), अष्ढ्वाश्राद्धं (मासिकश्राद्धस्यैवापरप्रकारः) अन्वष्टक्योऽन्वष्टका वा (पिण्डपितृयज्ञस्य पार्वणश्राद्धस्य च सदृशम्), अन्वाहार्यश्राद्धं (मासिकश्राद्धमेकम्), आभ्युदयिकश्राद्धं वृद्धिश्राद्धं वा नान्दीश्राद्धं वा (पितृणां प्रतिनिधिभूतानां देवानां कृते सम्पाद्यमानं श्राद्धम्) महालयश्राद्धंचेति (आश्विनकृष्णपक्षेऽर्थात् पितृपक्षेऽनुष्ठीयमानं श्राद्धम्)। सूत्रग्रन्थेषु स्मृतिषु पुराणेषु चैतेषां सविस्तारं विवेचनं द्रष्टव्यम्। अन्तेऽत्रावधेयं तथ्यमस्ति यत् पिण्डयितृयज्ञ एव पितृपूजायाः श्राद्धकर्मणो वा मूलमथ चैतेषु सर्वेषु कर्मसु मूले वैदिकदेववादस्यावधारणा दृग्गोचरी भवति, तस्मात्कारणात्तु पितृणां प्रतिनिधिरूपेण वसुः, रूद्रः, आदित्यश्च श्राद्धस्य देवता अनुमता। सप्रमाणं मन्तव्यमिदं परिज्ञातुं लेखकस्य "श्राद्धकर्मणां वैज्ञानिकता तस्यौचित्यंच" इति शोधपत्र[१]मध्येतव्यमिति शम्।

**प्रो. राजेश्वर मिश्रः**
संस्कृत विभाग
कुरुक्षेत्र विश्वविद्यालय, कुरुक्षेत्र

---

[१] ७४ वीथिका शोध प्रत्रिका रमाशंकर त्रिवेदी स्मृति सभा, लखनऊ, अंक ३ सितम्बर २०१२ पृ. ९-२१